
# द्वितीयः पाठः । अव्ययमाला । (कण्ठस्थीकरणार्थम्)

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।
तस्यां हि काव्यं मधुरं तस्मादपि सुभाषितम् ।।

सुभाषितं नाम शोभनं भाषितम् । संस्कृतसाहित्ये विपुलानि सुभाषितानि सन्ति । अल्पाक्षरत्वं सुभाषितानां वैशिष्ट्यम् । मधुराणि गेयानि अर्थपूर्णानि एतानि सुभाषितानि । सुभाषितानां पठनेन वाणी सुसंस्कृता निर्दोषा च भवति । वक्तृत्वकलायां निपुणतासम्पादनार्थम् उत्कृष्ट-निबन्धलेखनार्थं च तानि अतीव उपयुक्तानि । अतः इयं सुभाषितानां माला छात्रैः अवश्यं कण्ठे धारणीया ।

**श्रोतुं कर्णौ, वक्तुमास्यं सुहास्यं**
**घ्रातुं घ्राणं पादयुग्मं विहर्तुम् ।**
**द्रष्टुं नेत्रे हस्तयुग्मं च दातुं**
**ध्यातुं चित्तं येन सृष्टं स पातु ।।१।।**

[येन **श्रोतुं** कर्णौ, **वक्तुं** सुहास्यम् आस्यं, **घ्रातुं** घ्राणं, **विहर्तुं** पादयुग्मं, **द्रष्टुं** नेत्रे, **दातुं** हस्तयुग्मं **ध्यातुं** च चित्तं सृष्टं सः (ईश्वरः) पातु ।]



**गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम् ।**
**केतकीगन्धमाघ्राय स्वयमायान्ति षट्पदाः ।।२।।**

[दूरे वसताम् अपि सतां, गुणाः दूतत्वं कुर्वन्ति । (यथा) षट्पदाः केतकीगन्धम् **आघ्राय** (मधुपानाय) स्वयम् आयान्ति ।]

**भुक्त्वा तृणानि शुष्काणि पीत्वा तोयं जलाशयात् ।**
**दुग्धं यच्छन्ति लोकेभ्यो धेनवो लोकमातरः ।।३।।**

[धेनवः शुष्काणि तृणानि **भुक्त्वा** जलाशयात् तोयं **पीत्वा** लोकेभ्यः दुग्धं यच्छन्ति । (ताः) लोकमातरः (खलु) ।]

**यस्य षष्ठी चतुर्थी च विहस्य च विहाय च ।**
**अहं कथं द्वितीया स्यात्, द्वितीया स्यामहं कथम् ।।४।।**

[यस्य (कृते) **विहस्य** (इति) षष्ठी, **विहाय** (इति) चतुर्थी, अहं कथं च (इति) द्वितीया स्यात् (तस्य) अहं द्वितीया (पत्नी) कथं स्याम् ?]

**स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः ।**
**इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ।।५।।**

[स्थानभ्रष्टाः दन्ताः, केशाः, नखाः नराः च न शोभन्ते इति **विज्ञाय** मतिमान् (नरः) स्वस्थानं न परित्यजेत् ।]

## भाषाभ्यासः



**श्लोकः १-**

**१. एकवाक्येन उत्तरत ।**

अ) ईश्वरेण श्रोतुं किं दत्तम् ?
आ) आस्यं कीदृशम् ?
इ) ईश्वरेण विहर्तुं किं दत्तम् ?

**२. तालिकां पूरयत।**

| किं दत्तम् | किं कर्तुम्? | किमर्थम् ? |
|---|---|---|
| कर्णौ दत्तौ | श्रोतुम् | श्रवणार्थम्/श्रवणाय |
| आस्यं दत्तम् | वक्तुम् | वचनार्थम्/वचनाय |
| घ्राणं दत्तम् | ________ | घ्राणार्थम्/________ |
| पादयुग्मं दत्तम् | ________ | ________/विहाराय |
| नेत्रे दत्ते | द्रष्टुम् | ________/दर्शनाय |

**३. मेलनं कुरुत।**

| अ | आ |
|---|---|
| कर्णः | करः |
| आस्यम् | रक्षतु |
| घ्राणम् | लोचनम् |
| पादः | श्रोत्रम् |
| नेत्रम् | तुण्डम् |
| हस्तः | नासिका |
| पातु | चरणः |

**श्लोकः २ –**

**१. एकवाक्येन उत्तरत।**

अ) के दूतत्वं कुर्वन्ति ?
आ) के केतकीम् आजिघ्रन्ति ?

**२. सत्यं वा असत्यं लिखत।**

अ) सज्जनाः दूतत्वं कुर्वन्ति।
आ) षट्पदाः स्वयम् आयान्ति।
इ) सज्जनाः केतकीगन्धम् आजिघ्रन्ति।

**३. समानार्थकशब्दं चिनुत लिखत च।**

सज्जनाः, भ्रमराः, आगच्छन्ति।

**४. विरुद्धार्थकशब्दं लिखत।** गुणाः, दूरे, आयान्ति।

**श्लोकः ३ –**

**१. एकवाक्येन उत्तरत।**

अ) धेनवः किं भुक्त्वा दुग्धं यच्छन्ति ?
आ) धेनवः जलाशयात् किं पिबन्ति ?
इ) लोकमातरः काः ?

**२. श्लोकात् त्वान्त–अव्यये चित्वा लिखत।**

**३. वाक्यं पठित्वा कर्ता, कर्म क्रियापदं च अन्विष्यत लिखत च।** दुग्धं यच्छन्ति धेनवः।

**४. एकवचने परिवर्तयत।**

लोकमातरः धेनवः शुष्काणि तृणानि खादन्ति।

**श्लोकः ४ –**

**१. श्लोकात् ल्यबन्त–अव्ययानि चिनुत।**

**२. योग्यं रूपं चिनुत।**

अ) षष्ठी– विहस्य/देवस्य ।
आ) चतुर्थी– विहाय/गेहाय ।
इ) प्रथमा– अहम्/कथम् ।

**श्लोकः ५ –**

**१. एकवाक्येन उत्तरत।**

अ) स्थानभ्रष्टाः के के न शोभन्ते ?
आ) किं विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ?

**२. समानार्थकशब्दैः वाक्यं पुनर्लिखत।**

स्थानभ्रष्टाः दन्ताः केशाः नखाः नराः न शोभन्ते।

**३. श्लोकात् प्रथमाविभक्तेः रूपाणि चित्वा लिखत।**